दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः
■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-333
1
26.09.2024 गुरुवासर वि.सं. २०८० आश्विन नवमी आश्विन 11 प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## जम्मू-कश्मीरे द्वितीयचरणस्य विधानसभानिर्वाचने पञ्चवादनपर्यन्तं चतुःपञ्चाशत्-प्रतिशतं मतदानं जातम्



जम्मू-कश्मीरे द्वितीयचरणस्य विधानसभानिर्वाचने त्रिवादनपर्यन्तं पञ्चवादनपर्यन्तं चतुःपञ्चाशत्- प्रतिशतं मतदानं जातम्। उत्साहि-मतदातॄणां दीर्घाः पंक्तयः स्वस्य मताधिकारस्य प्रयोगाय सिद्धाः दृष्टाः। केन्द्रशासितप्रदेशस्य षट्मण्डलेषु षविंशतिः विधानसभाखण्डेषु सर्वेषु द्वि-अधिक-पञ्चशतोत्तर-त्रिसहस्र मतदानकेन्द्रेषु कठिन-सुरक्षा- व्यवस्थानां मध्ये मतदानं प्रातः सप्तवादने आरब्धम्। अस्मिन् चरणे, एकोन-चत्वारिंशदुत्तर-द्विशतम् अभ्यर्थीनां भाग्यस्य निर्णयं प्रायः पादोन षड्विंशति-लक्षं मतदातारः करिष्यन्ति।

## एशिया-शक्तिसूचकाङ्के जापानदेशं अतिक्रम्य भारतं तृतीयं शक्तिशाली राष्ट्रम् अभवत्




एशिया-शक्तिसूचकाङ्के जापानदेशं अतिक्रम्य भारतं तृतीयं शक्तिशाली राष्ट्रम् अभवत्। ऐषमे एशिया-शक्ति-सूचकाङ्क प्रतिवेदने सूचितं यत् कोविड्-उत्तरस्य प्रबल-आर्थिक-वृद्ध्या भारतस्य आर्थिकक्षमता चत्वारि-दशमलव-द्वे बिन्दुभिः वर्धिता अस्ति। प्रतिवेदने इदमपि प्रकाशितं यत् भारतेन अन्येषु सर्वेषु संसाधनमापेषु विशेषतः भविष्य-संसाधनेषु उत्तमं प्रदर्शनं कृतम्, यत्र तस्य परिणामः अष्टौ-दशमलव-द्वे इति अंकैः वर्धितः।

## शनिवासरपर्यन्तं कोंकणक्षेत्रेषु, गोवायाम्, मध्यमहाराष्ट्रे, गुजराते, मध्यप्रदेशे अतिवृष्टि-

भारतीय-ऋतु-विज्ञानविभागेन आगामि-शनिवासरपर्यन्तं कोंकणक्षेत्रेषु, गोवायाम्, मध्यमहाराष्ट्रे, गुजराते, मध्यप्रदेशे च अतोऽपि अतिवृष्टि-सञ्चेतना प्रख्यापितास्ति। अपि च अद्य समुद्री-तटीय-प्रदेशेषु, मध्य-कर्णाटके, विदर्भायां च अतिवृष्टिपरा सञ्चेतना अनुमानिता। अनेन विभागेन असमे, मेघालये, अरुणाचलप्रदेशे, पश्चिम-बंगे, सिक्किमे च श्वः यावत् महती वृष्टिः प्रकल्पिता।

## हरियाणाविधानसभानिर्वाचनम्- प्रचाराभियाने प्रधानमन्त्री नरेन्द्रमोदी सोनीपतस्य गोहानायां जनाशीर्वाद-सभां सम्बोधितवान्



हिमसंस्कृतवार्ताः। हरियाणाविधानसभा-निर्वाचनाय प्रचाराभियानम् सजवं प्रवर्तते। प्रधानमन्त्री तथा भाजपा दलस्य वरिष्ठः नेता नरेन्द्रमोदी सोनीपतस्य गोहानायां द्वाविंशतिः विधानसभा-क्षेत्राणां दलस्य अभ्यर्थिनः पक्षे जनाशीर्वाद-सभां सम्बोधितवान्। अस्मिन् अवसरे श्रीमोदी एनडीए- सर्वकारेण समारब्धस्य मेक इन इण्डिया-उपक्रमस्य लाभान् प्रकाशितवान् । प्रधानमन्त्री अवदत् यत् हरियाणा-भाजपासर्वकारस्य कार्यकाले उद्योग-कृषि इत्यादिषु क्षेत्रेषु हरियाणा राज्येण शीर्षराज्येषु स्वस्थानं संरक्षितम् अस्ति। सः अवदत् यत् राज्ये भाजपायाः समर्थनं प्रतिदिनं वर्धमानम् अस्ति। कुरुक्षेत्रे भाजपायाः वरिष्ठः नेता तथा केन्द्रीयमन्त्री नितिन गडकरी जनसभाम् सम्बोधितवान्। भारतीय राष्ट्रीय लोकदलेन पूर्व उपप्रधानमंत्री चौधरी देवीलाल वर्यस्य जयंत्यवसरे जिन्द मण्डलस्य जुलानायां जननायकसम्मान इति पथ प्रदर्शन्याः आयोजनं कृतम्। बहुजनसमाजपार्टीति दलस्य प्रमुखा मायावती, शिरोमणि अकाली दलस्य च प्रमुखः सुखबीर बादलः अपि आई.एन.एल.डी नेतृभिः सह सभां सम्बोधयिष्यन्ति। आम आदमी पार्टीति दलस्य राष्ट्रिय संयोजकः अरविन्द केजरीवालः अपि मेहम् इत्यत्र जनसभां सम्बोधितवान्। नवति सदस्यानां हरियाणाविधानसभायाः मतदानं अक्टोबर् पञ्चमे दिनाङ्के भविष्यति, मतदानस्य गणना अक्टोबर् अष्टमे दिनाङ्के भविष्यति।

## उपराष्ट्रपति जगदीप धनखड़ः अन्ताराष्ट्रियव्यापारप्रदर्शिन्याः द्वितीयसंस्करणस्य उद्घाटनं कृतवान्



उपराष्ट्रपतिः जगदीप धनखड़ः उत्तरप्रदेशस्य ग्रेटर नोएडायां उत्तरप्रदेश अन्ताराष्ट्रियव्यापारप्रदर्शन्याः द्वितीयसंस्करणस्य उद्घाटनं कृतवान्। उद्घाटनसत्रं सम्बोधयन् श्रीधनखड़महोदयः उत्तरप्रदेशे सूक्ष्म-लघु-मध्यम-उद्यम-क्षेत्रस्य विकासस्य प्रशंसाम् अकरोत्। कार्यक्रमस्य उद्घाटनसमारोहे केन्द्रीयसूक्ष्म-लघु-मध्यम-उद्यममन्त्री जीतनराममांझी, उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः चापि उपस्थितौ आस्ताम्। मन्त्री जीतनराम मंझी स्वसम्बोधने देशे सूक्ष्म- लघु-मध्यम-उद्यम क्षेत्रस्य कृते क्रियमाणानां कार्याणां विषये उक्तवान्। उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः अवदत् यत् राज्यस्य प्रायः षण्णवतिः लक्षं यावत् सूक्ष्म-लघु-मध्यम-उद्यमाः देशस्य आर्थिकवृद्धौ महत्त्वपूर्ण योगदानं ददति। सः अवदत् यत्, उत्तरप्रदेशः देशस्य विकासस्य, विकास अभियन्त्रम् अस्ति।

## भारतास्ट्रेलिया राष्ट्रयोः मध्ये व्यापारे महती वृद्धिः अभवत्-उद्योगमन्त्री पीयूषगोयलः



केन्द्रीयवाणिज्य-उद्योगमन्त्री पीयूषगोयलः उक्तवान् यत् भारतं आस्ट्रेलिया च व्यापक-आर्थिक-सहकार-सन्धि-माध्यमेन आर्थिक-सहकार-व्यापार-सहयोगस्य सुदृढीकरणाय कार्यं कुर्वतः। गोयलः उक्तवान् यत् उभयपक्षेषु विपणीप्रवेशः सुलभायितः तथा च द्वयोः राष्ट्रयोः मध्ये व्यापारे महती वृद्धिः अभवत्। एडिलेड्-नगरे संयुक्त-पत्रकारसम्मेलनं सम्बोधयन् गोयल्-महोदयः आस्ट्रेलिया-देशस्य सिड्नी-नगरे व्यापार-प्रवर्धनार्थं कार्यालयस्य स्थापनायाः घोषणां कृतवान्। कार्यालये इन्वेस्ट् इण्डिया, नेशनल् इंडस्ट्रियल कॉरिडोरडेवलपमेंटकापरिशनलिमिटेड, एक्सपोर्ट क्रेडिट् गारण्टीकार्पोरेशन आफ् इण्डिया लिमिटेड इत्यादीनां संस्थानां प्रतिनिधयः भविष्यन्ति। सः अवदत् यत् एते कार्यालयाः निवेशकानां व्यापारिणां च मध्ये सेतुरूपेण कार्यं करिष्यन्ति। गोयलमहोदयेन मेक इन इण्डिया इत्यस्य कार्यक्रमस्य सफलतायाः विषये अपि प्रकाशितम्। सः अवदत् यत् एषः कार्यक्रमः अद्वितीय-सफलतां प्राप्नोत्, यत् स्टार्ट-अप इत्यमुं प्रोत्साहयति, भारते विनिर्माणस्य प्रवर्धने च करोति।

## गीतोपदेशः

**भवान्भीष्मश्च कर्णश्च**
**कृपश्च समितिंजयः ।**
**अश्वत्थामा विकर्णश्च**
**सौमदत्तिस्तथैव च ॥ ८ ॥**

**शब्दार्थ-** भवान् - आप; भीष्मः - भीष्म पितामह; च - भी; कर्णः - कर्ण; च - और; कृपः - कृपाचार्य; च - तथा; समितिञ्जयः - सदा संग्राम-विजयी; अश्वत्थामा - अश्वत्थामा; विकर्णः - विकर्ण; च - तथा; सौमदत्तिः - सोमदत्त का पुत्र; तथा - भी; एव - निश्चय ही; च - भी।

**भावार्थ**

मेरी सेना में स्वयं आप, भीष्म, कर्ण, कृपाचार्य; अश्वत्थामा, विकर्ण तथा सोमदत्त का पुत्र भूरिश्रवा आदि हैं जो युद्ध में सदैव विजयी रहे हैं ।

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## प्रधानमन्त्री नरेन्द्रमोदी दश-वर्षाणां मेक इन इण्डिया इत्यस्य उपक्रमस्य सम्पन्नतायाः प्रशंसां कृतवान्

प्रधानमन्त्री नरेन्द्रमोदी दश-वर्षाणां मेक इन इण्डिया इत्यस्य उपक्रमस्य सम्पन्नतायाः प्रशंसां कृतवान्। सामाजिक संजालीय-सन्देशे श्रीमोदी-महोदयेन बोधितं यत् 'मेक इन इण्डिया' इति राष्ट्र विनिर्माण-नवाचार-शक्तिकेन्द्रे परिणमयितुं समस्त-भारतीयानां सामूहिक-संकल्पं दर्शयति। सर्वकारस्य प्रतिबद्धतां सः उक्तवान् यत् तस्य सर्वकारः सर्वैः सम्भवैः उपायैः 'मेक इन इण्डिया' इत्यस्य प्रोत्साहनं करोति ।

## पंडित दीनदयाल उपाध्याय-जन्मजयन्ती

प्रधानमंत्री नरेन्द्र मोदी, गृहमंत्री अमितशाहः,रक्षामंत्री राजनाथसिंहः च पंडितदीनदयाल उपाध्यायवर्यस्य जयन्त्यवसरे श्रद्धा-कुसुमान् समर्पितवन्तः। सामाजिक- संजालीय-सन्देशे प्रधानमन्त्रिणा कथितं यत् महान् राष्ट्रवादीचिन्तकेन प्रवर्तितायाः अन्त्योदयस्य अवधारणा विकसितस्य भारतस्य संकल्पं प्राप्तुं अमूल्यं भूमिकां निर्वहति।

## न्यायमूर्तिः राजीव शकधरः हिमाचल- उच्चन्यायालयस्य मुख्यन्यायाधीशः, राज्यपालः शपथवचनं कारितवान्



हिमसंस्कृतवार्ताः- शिमला। राज्यपालः शिवप्रतापशुक्लः बुधवासरे राजभवने हिमाचलप्रदेशस्य उच्चन्यायालयस्य मुख्यन्यायाधीशरूपेण न्यायाधीशाय राजीवशकधराय पदस्य शपथं दत्तवान्। मुख्यसचिवः प्रबोध सक्सेना इत्यनेन शपथग्रहणसमारोहस्य कार्यविधिः कृता, भारतराष्ट्रपतिना निर्गतं नियुक्तिपत्रं च पठितम्। लेडी गवर्नर जानकी शुक्ला, कृषिमंत्री चंद्रकुमारः, लोकनिर्माणमंत्री विक्रमादित्यसिंहः, तकनीकीशिक्षा मंत्री राजेश धर्माणी, हिमाचलप्रदेशस्य उच्चन्यायालयस्य न्यायाधीशाः, दिल्ली-उच्चन्यायालयस्य न्यायाधीशाः, प्रदेश कांग्रेसाध्यक्षा प्रतिभासिंह, प्रदेश भाजपाध्यक्षः राजीवबिंदलः, महाधिवक्ता अनूप कुमाररतनः, पुलिसमहानिदेशकः डॉ. अतुलवर्मा, हिमाचलप्रदेश- राज्य-मानवाधिकार- आयोगस्य अध्यक्षः न्यायमूर्ति पी.एस.राणा, प्रदेश निर्वाचनायुक्तः अनिल खाची, विभिन्न बोर्डाणां एवं निगमानाम् अध्यक्षा एवं उपाध्यक्षाः, राज्यसर्वकारस्य वरिष्ठाधिकारिणः, हिमाचलप्रदेश-उच्चन्यायालयस्य मुख्यन्यायाधीशस्य परिजनाश्च अस्मिन्नवसरे उपस्थिताः अभवन्।

### न्यायमूर्तिः राजीवशकधरः

न्यायाधीशः राजीवशकधरस्य जन्म १९६२ तमे वर्षे अक्तूबर-मासस्य १९ दिनाङ्के अभवत्। सः वाणिज्यस्नातकम् (आनर्स), सी.ए., एल. एल. बी. इत्येतेषां शिक्षाः अधिगतवान्। १९ नवम्बर १९८७ तमे वर्षे च अधिवक्तारूपेण पञ्जीकृतः अभवत्। सिविल-निगम-विषयेषु विशेषज्ञः न्यायाधीशः राजीव शकधरः सर्वोच्चन्यायालये, दिल्ली- उच्चन्यायालये च सिविल- संवैधानिक- कर- श्रम- कम्पनी- सेवाविषयेषु अभ्यासं कृतवान् सः ११ एप्रिल २००८ दिनाङ्के दिल्ली उच्चन्यायालयस्य अतिरिक्तन्यायाधीशरूपेण, १७ अक्तूबर २०११ दिनाङ्के स्थायी न्यायाधीशरूपेण च नियुक्तः। २०१६ तमस्य वर्षस्य एप्रिल-मासस्य ११ दिनाङ्के मद्रास-उच्चन्यायालये, पुनः २०१८ तमस्य वर्षस्य जनवरीमासस्य १५ दिनाङ्के च दिल्ली-उच्चन्यायालये स्थानान्तरितः।

## Northern Railway: बैजनाथपपरोला- काङ्गड़ामध्ये रेलसेवा पुनर्स्थापिता, वीरवासरादारभ्यः रेलयानं प्रचलिष्यति




हिमसंस्कृतवार्ताःकाङ्गड़ा। हिमाचलप्रदेशे पुनर्स्थापनानन्तरं बैजनाथपपरोला- काङ्गड़ा मध्ये रेलसेवा २६ सितम्बरतः पुनः स्थापिता भविष्यति। वरिष्ठसंभागीयः वाणिज्यिकप्रबन्धकः परमदीपसिंहः सैनी एतां सूचनां दत्तवान्। सः अवदत् यत् काङ्गड़ा- उपत्यका- रेलवे पठानकोट- नूरपुर- कांगड़ा- बैजनाथपपरौला- जोगिन्दरनगरात् संकीर्णमार्गरेलसंपर्कं प्रददाति। अस्मिन् मानसूनर्तौ जुलैमासात् आरभ्य अस्मिन् प्रदेशे प्रचण्डवृष्ट्या अनेकस्थानेषु पर्वतस्खलनानां परिणामेण पटले शिलाः पतिताः, केषुचित् स्थानेषु पटलतटाः गुहायां पतिताः यात्रिकाणां सुरक्षां सुनिश्चित्य ६ जुलाई दिनाङ्के रेलयानसञ्चालनार्थं निरुद्धः अभवत्। सः अवदत् यत् बैजनाथपपरोला-काङ्गड़योः मध्ये रेलयानयोः युग्मयोः संचालनं भविष्यतः यथा - बैजनाथपपरोलातः प्रातः ६:३० वादने ०४७०० संख्यांकं रेलयानं प्रस्थास्यति, प्रातः ०८:४५ वादने काङ्गड़ानगरं प्राप्स्यति, प्रतिफलरूपेण ०४६९९ संख्यांकं रेलयानं काङ्गड़ातः प्रातः ९:०० वादने प्रस्थास्यति, मध्याह्न १२:०० वादने बैजनाथपपरोलानगरं प्राप्स्यति। ०४६८६ क्रमाङ्कं रेलयानं बैजनाथपपरोलातः सायं ३:०० वादने प्रस्थास्यति, ५:१० वादने काङ्गरानगरं आगमिष्यति तथा च प्रतिफलरूपेण रेलसंख्या ०४६८५ काङ्गरातः सायं ६:०० वादने प्रस्थाय ८:२० वादने बैजनाथपपरोलानगरं प्राप्स्यति। एतानि रेलयानानि उभयदिशि मझेहरा हिमाचलं, पञ्चरुखी, पट्टीराजपुरा, पालमपुरं हिमाचलं, सुलह हिमाचलं, परौर, चामुण्डामार्ग, नगरोटा, समलोटी, काङ्गड़ामन्दिरस्थानकम् इत्यत्र स्थगयिष्यन्ति।

## HPCM- 'समीपस्थानां राज्यानां तुलनायां हिमाचलस्य उद्योगेभ्यः न्यूनमूल्येन विद्युतापूर्तिः क्रियते'- मुख्यमंत्री सुखविन्दरसिंहसुक्खुः



हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारः निवेशकानां प्रवर्धनार्थम् उद्योगसौहृदनीतयः निर्मातुं प्रतिबद्धतया सह कार्यं कुर्वन् अस्ति। राज्यसर्वकारेण उद्योगेभ्यः प्रदत्तं विद्युत् अनुदानं युक्तियुक्तं कृत्वा राज्यस्य उद्योगेभ्यः समीपस्थराज्यानां तुलनायां न्यूनमूल्येन विद्युत्प्रदानं क्रियते। सः अवदत् यत् ३३ केवीतः २२० केवीपर्यन्तं वोल्टेजसप्लाई युक्ताः बृहत् उद्योगाः समीपस्थराज्यपञ्जाब, हरियाणा, उत्तराखण्ड इत्यादीनां तुलनायां प्रति यूनिट ₹ 1 इत्यस्मात् अधिकेन न्यूनदरेण विद्युत् प्रदास्यन्ते। एतेन सिद्धं भवति यत् हिमाचलप्रदेशस्य उद्योगाः अद्यापि समीपस्थराज्यानां तुलनायां न्यूनमूल्येन विद्युत्प्रवाहस्य लाभं प्राप्नुवन्ति। राज्ये केवलं १५९ उद्योगाः सन्ति येषां आपूर्तिवोल्टेजः ३३ केवीतः २२० केवीपर्यन्तं भवति।

मुख्यमन्त्री उक्तवान् यत् ३३ केवीतः २२० केवीपर्यन्तं वोल्टेज- आपूर्तियुक्तानां बृहत्- उद्योगानाम् अतिरिक्तं राज्ये ११ केवी- २२ केवी-पर्यन्तं वोल्टेज-आपूर्तियुक्ताः २०११ उद्योगाः सन्ति। एतेषां उद्योगानां कृते अपि समीपस्थराज्यानां तुलनायां प्रति यूनिट ₹ 1 इत्यस्मात् अधिकेन न्यूनदरेण विद्युत् प्रदत्ता अस्ति। एतेषाम् उद्योगानां समर्थनार्थं सर्वकारेण विद्युत्शुल्कं १६.५ प्रतिशतात् १० प्रतिशतं यावत् न्यूनीकृतम् अस्ति। सः अवदत् यत् राज्यसर्वकारः राज्ये विशेषतया ३१,२९८ लघुमध्यम-उद्योगानां प्रचारार्थं प्रतिबद्धः अस्ति। एतेषाम् उद्योगानां कृते अनुदानस्य ऊर्जाशुल्कस्य च परिवर्तनं न भविष्यति। मुख्यमंत्री सुक्खुः उक्तवान् यत् विद्युत् अनुदानस्य युक्तिकरणेन राज्यस्य उद्योगानां किमपि हानिः न भविष्यति, औद्योगिकविकासः च प्रवर्तते। सः अवदत् यत् राज्यस्य सहस्राणि युनः एतेभ्यः उद्योगेभ्यः प्रत्यक्षं परोक्षं च रोजगारं प्राप्नुवन्ति। राज्यं तेषां निरन्तरविकासाय प्रतिबद्धतापूर्वकं कार्यं कुर्वन् उद्योगसौहृदनीतयः सुनिश्चिताः भवन्ति।

## हिमाचले पञ्चभारतीयप्रशासनिक- अधिकारीणां स्थानान्तरणम्

हिमसंस्कृतवार्ताः शिमला। हिमाचलसर्वकारेण पञ्चानां आईएएस- अधिकारिणां स्थानान्तरण-नियुक्ति- आदेशाः प्रसारिताः सन्ति। मुख्यसचिवः प्रबोध सक्सेना बुधवासरे तस्य आदेशान् प्रसारितवान्। ए. शैनामोल मण्डलायुक्तः कांगड़ा मण्डीं स्थानांतरितः। अत्र सः मण्डलायुक्तरूपेण कार्यं करिष्यति। २००८ वर्गस्य भारतीय- प्रशासनिक- सेवाधिकारी कदम संदीपः वसंतः सचिवः आयुषतः सचिवः तकनीकीशिक्षायां स्थानांतरितः। सः शिमलामण्डलस्य मण्डलायुक्तस्य अतिरिक्तप्रभारम् अपि धारयिष्यति। २००८ वर्गस्य भारतीय- प्रशासनिक- सेवाधिकारिणी राखिल काहलों, या मण्डीमण्डलस्य मण्डलायुक्त आसीत्, तस्यै सचिवस्य आयुषस्य दायित्वं दत्तम्। २००९ वर्गस्य भारतीयप्रशासनिकसेवाधिकारिणः विनोदकुमारस्य स्थानान्तरणं काङ्गड़ा केन्द्रीयवित्तकोषस्य प्रबन्धनिदेशकतः काङ्गड़ायाः मण्डलायुक्ते कृतम्। २०१३ वर्गस्य आदित्यः नेगी निस्तारणाधिकारी, कांगड़ामण्डलं कांगड़ाकेन्द्रीयवित्तकोषस्य प्रबन्धनिदेशकस्य (एमडी) अतिरिक्तं प्रभारं धारयिष्यति।

## कृष्यधिनियमानां विषये कंगना- रणौतस्य परिवर्तितानि वचनानि

नई दिल्ली। मण्डी संसदीय आसनतः भाजपा सांसद कङ्गना रानौत इत्यनया खेदं प्रकटितम्। विवादास्पदानां त्रीणां कृषिकानूनानां पुनः कार्यान्वयनसम्बद्धं वचनं निवृत्तं च कृतम्। मंगलवासरे मीडियाभिः सह वार्तालापं कुर्वन् कङ्गना २०२१ तमे वर्षे निरसितानां त्रयाणां कृष्यधिनियमानां पुनः कार्यान्वयनस्य विषये उक्तवती आसीत्। सा उक्तवती यत्, “अहं जानामि यत् एतत् वचनं विवादास्पदं भवेत्, परन्तु कृषिनियमत्रयं पुनः आनेतव्यम् । कृषकाः एव एतत् आग्रहं कुर्वन्तु” इति । सा अवदत् यत् एते नियमाः कृषकाणां कृते लाभप्रदाः सन्ति किन्तु केषुचित् राज्येषु कृषकसमूहानां विरोधं दृष्ट्वा केन्द्रेण ताः निरस्ताः। तस्याः टिप्पणीविषये विवादस्य अनन्तरं बुधवासरे कङ्गना रणौतः तत् निवृत्तवती।

# वैदिकाह्निकाः

वेदशब्दः संस्कृतवाङ्गयस्य "वेद" (वेदः) इति शब्दात् प्राप्तः, यस्य अर्थः "ज्ञानम्" वा "पवित्रं विज्ञानम्" अस्ति। "वेदिक" शब्दः वेदसंबद्धं किमपि सूचयति, यत् वेदानां प्राचीनपवित्रग्रन्थेषु समाहितानि स्तोत्राणि, प्रार्थनाः, कर्माणि, दार्शनिकचिन्तनानि च अन्तर्भवन्ति।
"वेद" शब्दः "विद्" (विद्) इति धातोः निष्पन्नः, यस्य अर्थः "ज्ञातुम्" वा "ज्ञानम्" इति। अतः "वेदिक" इति तु "वेदानां सम्बद्धः" अथवा "ज्ञानसम्बद्धः" इत्यर्थे भवति। "आह्निकाः" शब्दः संस्कृतशब्दात् "आह्निक" (आह्निकः) उत्पन्नः अस्ति, यस्य अर्थः "दैनिकः" वा "दैनिककर्मसु सम्बद्धः" इति।
"आह्निक" शब्दः "अह्न" (अह्न) इति मूलधातोः प्राप्तः अस्ति, यस्य अर्थः "दिनम्" इति। अतः "आह्निकाः" तु तानि दैनिकानि अनुष्ठानानि वा कर्माणि ये प्रतिदिनं कर्तव्यानि, तेषु नित्यप्रयत्नस्य परिपालनं सम्प्रदर्शयन्ति।
अस्मिन प्रकारेण: वैदिक = वेदात् (ज्ञान, विज्ञान) निष्पन्नः।
आह्निकाः = आह्निकात् (दैनिककर्मसु) निष्पन्नाः।
"वेदिक आह्निकाः" तु तानि दैनिकानि अनुष्ठानानि कर्माणि च यानि वेदात् निष्पन्नानि, विशेषतः तानि अनुशासनं जीवनशैलीं च प्रतिपादयन्ति। "आह्निक" इति शब्दः संस्कृतवाङ्मये "दैनिककर्म" इत्यर्थे प्रयुज्यते। अतः "वेदिक आह्निकाः" तु वेदानुसारं प्रतिदिनं कर्तव्यानि अनुष्ठानानि कर्माणि च भवन्ति, यानि उपासनेन अनुशासनस्य च पालनं सूचयन्ति। एतेषु अनुष्ठानेषु मुख्यतः भवन्तिः १. संध्यावन्दनम् – तानि दैनिकप्रार्थनानि यानि दिनस्य संक्रमणकाले, यथा प्रातःकाले, मध्याह्ने, सायं काले च कुर्वन्ति। २. अग्निहोत्रम् – पवित्राग्नौ हविर्यजनम्। ३. गायत्री जपः – अत्यन्तपुण्यमयस्य गायत्रीमन्त्रस्य जपः। **४. देवतापूजा –** नित्यं कुटुम्बदेवतायाः वा व्यक्तिगतदेवतायाः पूजनम्। ५. स्नानम् – स्नानद्वारा पवित्रीकरणम्। ६. वैदिकपाठः – प्रतिदिनस्य अनुशासनरूपेण विशिष्टवेदमन्त्राणां पाठः।

## वैदिक आह्निकानां उत्पत्तिः एवं क्रमः

वेदिक आह्निकानां मूलं प्रत्यक्षं वेदेषु, श्रौतसूत्रेषु च अस्ति, ये वैदिकवाङ्मये अन्तर्भवन्ति। एते सूत्राणि निश्चितानाम् अनुष्ठानानाम् निर्देशं यथाविधिं गृहमध्ये (गृह्य) तथा च सार्वजनिकविधौ वा (श्रौत) कुर्वन्ति। वेदाः वैदिकज्ञानस्य आधारभूतग्रन्थाः, यत्र स्तोत्राणि, अनुष्ठानानि, दार्शनिकविचाराः च अन्तर्भवन्ति। श्रौतसूत्राणि: तानि ग्रन्थाः ये बहुभिः जनैः सह सार्वजनिकमहाकर्माणां विशदवर्णनं कुर्वन्ति। गृह्यसूत्राणि: तानि ग्रन्थाः ये गृहस्थैः प्रतिदिनं कर्तव्यानां अनुष्ठानानां विवरणं कुर्वन्ति, यथा पञ्चमहायज्ञाः (पञ्चमहायज्ञाः), अग्निहोत्रं च अन्यानि नित्यकर्माणि। संक्षेपेण, वेदिक आह्निकाः तु तानि कर्तव्यानि कर्माणि च येन व्यक्तिः वैदिकज्ञानानुसारं जीवनं सम्पादयति, आत्मीयं च सार्वजनिकं कर्तव्यं कुर्वन् पवित्रतां अनुशासनं च धारयति तथा च दिव्येन सम्बद्धः भवति।

## पञ्च महायज्ञाः (पञ्चमहायज्ञाः)

पञ्चमहायज्ञाः तु तानि पञ्च अनिवार्यनित्यकर्माणि यानि वैदिकपरम्परायां गृहस्थाय उपदिष्टानि, यानि जीवनस्य समरसतां सामञ्जस्यं च परिपालयन्ति। एते कर्तव्याः गृह्यसूत्रेषु धर्मशास्त्रेषु च उल्लिखिताः सन्ति, ये तु



व्यक्तिः विभिन्नेषु जीवनमण्डलेषु कृतज्ञतां सम्प्रकाशयति।
पञ्चमहायज्ञेषु भवन्तिः १. ब्रह्मयज्ञः (ऋषियज्ञः) – वेदद्रष्टॄणां ऋषीणां प्रति समर्पणम्।
एषः तु वेदाध्ययनं पाठश्च, येन वेदद्रष्टॄणां ऋषीणां प्रति कृतज्ञतां सम्प्रकाशयन् व्यक्ति दिव्यज्ञानस्य परम्परायाः परिपालनं साधयति।
**२. देवयज्ञः – देवताः प्रति यज्ञः।**
अयं देवेषु हविः यथाशक्ति अग्निहोत्रादिना कर्मणाः यज्ञः, येन दिव्यानां शक्तीनां प्रति कृतज्ञतां सम्प्रकाशयन् जीवनसन्तुलनं सम्पादयति।
**३. पितृयज्ञः – पितॄणां प्रति समर्पणम्।**
एषः तु पितॄणां प्रति अन्नं वा जलं समर्पयन् तेषां आशीर्वादं प्रार्थयते, ये तु कुलस्य परम्परायाः परिपालकाः सन्ति।
४. भूतयज्ञः – सर्वप्राणिनां प्रति समर्पणम्।
एषः तु प्राणिनां, पक्षिणां, पशूनां च प्रति अन्नं समर्पयन् सर्वे प्राणी एकत्र सह अस्तित्वेन सहनिर्वहणं सम्प्रकाशयति।
५. मनुष्ययज्ञः – अन्यजनानां प्रति सेवा।
एषः तु अन्येषां मानवजनानां प्रति दानं वा सेवा, विशेषतः तेषां ये विपन्नावस्थायाम् सन्ति। एषः मानवसमाजे सामुदायिकहितस्य महत्वं प्रतिपादयति।
एते पञ्चमहायज्ञाः जीवनस्य समताम् अङ्गीकुर्वन्ति। एतेषां पालनद्वारा गृहस्थः आत्मानं पञ्चभिः क्षेत्रेषु, आत्मीयं, प्राकृतिकं, पितॄणां, प्राणिनां, मानवसमाजस्य च सन्दर्भे, समाहितं कृत्य जीवनं साधयति।....**सुधा साठ्ये मुंबई।**

# सूर्यग्रहणस्य सर्वपित्रु अमावस्यायां कोऽपि प्रभावः न भविष्यति





चंद्र शर्मा शास्त्री
हिमसंस्कृतवार्ता बड़ूखर

सर्वपितृ अमावस्या पितृणां श्राद्धं कर्तुं विशेषतमं दिवसं मन्यते यतः अस्मिन् दिने श्राद्धं कृत्वा पूर्वजाः जन्ममरणबन्धनात् मुक्तिं प्राप्नुवन्ति। सर्वपितृ अमावास्यादिने येषां श्राद्धं केनचित्कारणात् गम्यते तेषां सर्वेषां कृते अपि श्राद्धं क्रियते । तेषां सर्वेषां श्राद्धमपि अस्मिन् दिने कर्तुं शक्यते। अमावस्या तिथिः १ अक्टोबर् दिनाङ्के रात्रौ ९.४० वादने आरभ्यते। सर्वपितृ अमावस्या तिथिः २:१९ वादने समाप्ता भविष्यति। एतादृशे सति सर्वपितृ अमावस्या अक्टोबर् २ दिनाङ्के अस्ति।

## सर्वपितृ अमावस्यायाः महत्त्वम् :

सर्वपितृ अमावस्यायां अन्तिमश्राद्धं भवति । अस्मिन् दिने सर्वेषां पूर्वजानां नाम्ना श्राद्धक्रियाः कर्तुं शक्यन्ते । अस्मिन् दिने तेषां सर्वेषां कुलजनानाम् अपि नाम्ना श्राद्धं क्रियते येषां श्राद्धतिथिः न ज्ञायते । सर्वपितृ अमावस्यायां श्राद्धं, पिण्डदानं, तर्पणं च इत्यादीनि कृत्वा पूर्वजानां विशेषाशीर्वादः प्राप्यते।

## सूर्यग्रहणस्य किमपि प्रभावः न भविष्यति

पंडितचन्द्रशर्माशास्त्री इत्यनेन उक्तं यत् सूर्यग्रहणं १ अक्टोबर् दिनाङ्के रात्रौ ९.४० वादने आरभ्य २ अक्टोबर् दिनाङ्के सायं ३.१७ वादने समाप्तं भविष्यति। सर्वपितृ अमावस्यायां सूर्यग्रहणं भारते अदृश्यं तिष्ठति। अपि च, सूर्यग्रहणस्य समाप्तिः २ अक्टोबर्-मासस्य प्रातःकालात् पूर्वं भविष्यति यतः भारते ग्रहणस्य अदृश्यत्वात् तस्य सूतकालः अपि मान्यः न भविष्यति । एतादृशे सति अस्मिन् दिने श्राद्धकर्म कर्तुं शक्यते श्राद्धस्य कृते शुभकालः - प्रातः ११:४६ - अपराह्न १२:३४- अपराह्न १२:३४ - अपराह्न ०१:२१ तः अपराह्न ३:४३ पर्यन्तम्

## अमावस्यायां कस्य श्राद्धं क्रियते ?

सर्वपितृ अमावस्यायां सर्वेषां पितृणां श्राद्धं शुभम्। येषां जनानां मृत्युतिथिः न ज्ञाता तेषां श्राद्धं सर्वपितृ अमावस्ये अपि कर्तुं शक्यते ।

# अकिञ्चनोऽहम्, न वा कश्चन संस्कृतज्ञः

विज्ञानशिक्षकः,
नारदोपाध्यायः,
हिमसंस्कृतवार्ताः

अहं सामान्यः जनः एव, मयि न कापि विशेषता, अकिञ्चनोऽहम्, न वा कश्चन संस्कृतज्ञः एव । केवलम् कश्चन सामान्यः जिज्ञासुः, अभ्यासी वा । आनुष्ठानिकरूपेण, विद्यालयादिषु मया संस्कृतं न अधीतम् । मह्यं संस्कृतं रोचते इत्यतः गृहादिषु एव मया यत्किञ्चित् अभ्यासः कृतो वर्तते । तद्बलेन हि यथाज्ञानं लेखनभाषणादिकार्यं कुर्वन् अस्मि । अद्य भवद्भिः अहं श्लाघितः, प्रशस्तिपत्र-पुरस्कारादिभिः आदरभावः प्रदर्शितः । परन्तु नाहं तदर्थं योग्यः सर्वथा, तथापि भवद्भिः ममोपरि स्नेह-आशीर्वादादिकं परिकल्पितं यत् तन्मया आशीर्वादत्वेन, संस्कृतमातुः कृपाप्रसादं मत्वा वा तत्सश्रद्धं स्वीकृतमस्ति । एतदर्थं भवतां सर्वेषां, विशेषतः संस्कृतगोष्ठ्याः पुरतः अहम् ऋणी अस्मि । इतः अनृणः भवितुं नार्हामि कदापि । अत्र मां परितः बहवः संस्कृतज्ञाः, प्राध्यापकाः गुरुवराः विराजन्ते, अतः किमपि कथने मध्ये मध्ये सङ्कोचभावः अपि मनसि आगच्छति इति अनुभवामि । भवतां स्नेहबलेन हि अहमत्र भाषमाणोऽस्मि । यत्किमपि भवतु नाम बाल्यतः एव मम संस्कृतविषये सामान्यः अनुरागस्तु आसीदेव, गीतादिग्रन्थानां श्लोकाः अपि कण्ठस्थीकृताः आसन् तदा पितुः निर्देशत्वात् । परन्तु दौर्भाग्येन मम विद्यालयादिषु पाठ्यविषयः अन्यः एव जातः । संस्कृतपठनस्य सौभाग्यं न लब्धम्, विज्ञानविषयः अधीतः, यथाकालम् अस्मिन् विषये स्नातकत्वमपि अधिगतं, ततः शिक्षकवृत्याः सौभाग्यम् आगतम्, प्रायः चत्वारिंशद्वर्षाणि यावत् बालेभ्यः शिक्षादानं प्रदत्तम् । सद्यः एव, अर्थात् विगते जूलैमासस्य एकत्रिंशद्दिनाङ्के सेवानिवृत्तिरपि लब्धा । एवमेव मदीयानि दिनानि गच्छन्ति सन्ति । मम अनुभवः यत् जीवने किमपि प्राप्तव्यं चेत् आदौ कस्मिन्नपि विषये सुदृढः अनुरागः भवेत् तर्हि गच्छता कालेन तदवश्यं सिध्यति इति मयि पूर्णः विश्वासः, अत्र नास्ति सन्देहः । बाल्यकाले मन्मनसि संस्कृतविषयं ज्ञातुं यत् उत्कण्ठा आसीत् तन्न कदापि जीवने न्यूना अभवत् । परन्तु छात्रावस्थायाम् इतरविषयकारणतः संस्कृतभाषायाः अवगमनस्य अवकाशः न प्राप्तः मया । तथापि इतः पञ्चषेभ्यः



वर्षेभ्यः पूर्वं भाषाज्ञानप्राप्तये मन्मनः इतोऽपि अधिकं व्याकुलं जातम् । अतः तदारभ्य हि मया सामान्यतया संस्कृताभ्यासः स्वगृहे एव आरब्धः । सामान्यतया पठनं लेखनं सम्भाषणादिविषयं प्रति मनोनिवेशः कृतः । ततः शनैः शनैः भाषाज्ञानस्य प्रकाशः सामान्यतया लब्धोऽपि । शनैः मनसि साहसः उत्साहः इत्यादयः अपि समागताः अभवन् । वस्तुतस्तु विश्वे संस्कृतस्य एकः समृद्धः इतिहासः, परम्परा वा अस्ति । अस्माभिः उत्तराधिकारसूत्रेण प्राप्ता देववाणी इयम् । अस्माकम् सनातनधर्मस्य, संस्कृतेः, ज्ञानविज्ञानयोः च वाहिका वर्तते इयं भाषा । इयं यथा समृद्धा तथैव पवित्रा अपि । अस्मत्समाजे अद्यापि यज्ञपूजनादिकार्यं संस्कृतमाध्यमेन हि क्रियमाणम् अस्ति । एतत्र मन्तव्यं यत् संस्कृतं केवलं ब्राह्मणपुरोहितानां हि भाषा, नैव सत्यमेतत् सर्वथा, अपितु अस्माकं सर्वेषां नैजभाषा हि संस्कृतम् अस्ति । इतरभाषा इव संस्कृतेन अपि लेखनं, पठनं, पाठनं, सम्भाषणम् इत्यादिकः सर्वव्यवहारः कर्तुं शक्यते । संस्कृतं न कठिनं कदापि, अत्यन्तं सरलमस्ति अवगमनाय । सन्धिसमासादीनां अधिकयोजनेन हि किञ्चित् कठिनमिव भाति, परन्तु तद्विच्छिद्य अवलोक्यते तर्हि सुगमं हि भवति । इतरभाषासु प्राप्यमाणाः शब्दाः हि संस्कृते सन्ति । इतरभाषाणाम् उद्गमस्थानं हि संस्कृतं वर्तते । अन्यभाषासु प्रायः अशीतिप्रतिशतं शब्दाः संस्कृततः आगताः सन्ति । अतः संस्कृतम् अवगन्तुं न तावान् क्लेशः। मत्सम्भाषणं इतोऽपि दीर्घं न करोमि ।यतोहि अद्यतनी कर्यक्रमणिका अपि दीर्घा एव परिलक्ष्यते । अन्येभ्योऽपि सौविध्यं दातव्यं भवति । उपसंहारे एतदेव निर्दिष्टतया वदामि यत् आगच्छन्तु वयम् आबालवृद्धं सर्वेऽपि संस्कृतं नैजभाषा इति विज्ञाय पठनं पाठनं लेखनं भाषणं प्रसारणम् इत्यादिमाध्यमैः संस्कृतम् उज्जीवितं कुर्मः। एवञ्चेत् अस्माकं शास्त्रसंस्कृत्यादयः अपि सर्वदा सुरक्षिताः तिष्ठेयुः। अन्ते पुनः भवतः सर्वान् प्रणम्य मद्वचनम् अत्रैव विरमामि । जयतु भारतम् ! वन्दे संस्कृतमातरम् !